संस्कृतवार्ता:

22/06/24

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· भारत-बाङ्गलादेशाभ्यां अद्य अनेकेषु ज्ञापनपत्रेषु हस्ताक्षरं कृतम्।

· वित्तमन्त्री मंत्री निर्मला सीतारमनः अद्य नवदिल्ल्याम् सर्वेषां राज्यानां केन्द्र- शासित-प्रदेशानां च वित्त-मन्त्रिभिः सह प्राक्-आय-व्यय-पत्रक-चर्चा कृतवती।

· राष्ट्रिय-परीक्षा-अभिकरणं एन. टी. ए. इत्यनेन आयोज्यमानानां परीक्षाणां पारदर्शितया सुगमतया निष्पक्षतया संचालनं सुनिश्चियं कर्तुं शिक्षा-मंत्रालयेन एकस्य उच्चस्तरीय समितेः निर्माणं कृतम्।

· भारतस्य ज्योति-सुरेखा वेन्नमः, परनीत-कौर, अदिति-स्वामी तुर्किये इत्यत्र-अन्ताल्या-लक्ष्यसन्धान-विश्व-चषक-चतुश्चत्वारिंशदुत्तर-द्विसहस्रे कम्पाउंड-टीम- स्पर्धायां स्वर्ण-पदकं व्यजयन्त।

· आई.सी.सी पुरुष अन्ताराष्ट्रिय-क्रिकेट परिषद: पुरुष विंशति-विंशति- विश्व-चषक-चतुश्चत्वारिंशदुत्तर-द्विसहस्र इत्यस्यां श्रृङ्खलायाम् अद्य सायम् एंटीगुआया: नॉर्थसाऊण्ड इत्यत्र सर विवियन रिचर्डस स्टेडियम् इत्याख्ये क्रीडाङ्गणे सुपर-ऐट् अर्थात् उत्कृष्ट-अष्ट स्पर्धासु भारत-बांग्लादेशयोः स्पर्धा भविष्यति।

<u>भारत-बाङ्गलादेश</u>

भारत-बाङ्गलादेशाभ्यां अद्य अनेकेषु ज्ञापनपत्रेषु हस्ताक्षरं कृतम्। एतेषु सन्धिपत्रेषु आँकिक-हरित-अंशभागिता, समुद्र-सहकारिता, स्वास्थ्य-चिकित्सा, अन्तरिक्ष-सहभागिता, रेलमार्ग-संपर्कः, समुद्र-विज्ञानम्, आपद्-प्रबन्धनम्, मत्स्यपालनम् च इति क्षेत्राणि सन्ति। नवदिल्लीनगरे प्रधानमन्त्रिण: नरेन्द्रमोदिनः बाङ्गलादेशप्रधानमन्त्रिणः शेख-हसीनायाश्च वार्तालापानन्तरं एतानि सन्धिपत्राणि हस्ताक्षरितानि। एकस्यां वार्ताहरविज्ञस्यां प्रधानमन्त्री मोदी उक्तवान् यत् बाङ्गलादेशः भारतस्य नेबर फर्स्ट् एक्ट् ईस्ट इति नीतेः आधारशिला अस्ति। सः अवदत् यत् गते एकवर्षे उभाभ्याम् देशाभ्यां मिलित्वा जनकल्याणस्य कृते बहवः महत्त्वपूर्णाः परियोजनाः सम्पन्नाः।

<u>वित्रमन्त्री</u>

वित्तमन्त्री मंत्री निर्मला सीतारमणः अद्य नवदिल्ल्याम् सर्वेषां राज्यानां केन्द्र- शासित-प्रदेशानां च वित्त-मन्त्रिभिः सह प्राक्-आय-व्यय-पत्रक-चर्चां कृतवती। उपवेशने गोवा-मेघालय-मिजोरम-नागालैण्ड-सिक्किम-प्रदेशानां मुख्य-मन्त्रिणः, बिहार-मध्यप्रदेश-ओडिशा-राजस्थान-तेलंगाना-प्रदेशानामुपमुख्यमन्त्रिणः केन्द्रीय-वित्त- राज्यमंत्री पंकज-चौधरी, वित्त-सचिवः टी.वी. सोमनाथनः वरिष्ठाः अधिकारिणश्च भागं गृहीतवन्तः।

<u>जी.एस.टी.</u>

वस्तु एवं सेवाकर-संघस्य त्रिपञ्चाशत्तमा गोष्ठी सम्प्रति नवदिल्यां प्रचलन्ती। वित्तमंत्री निर्मला-सीतारमणः संघस्य गोष्ठ्या: आध्यक्षत्वं विदधाति। वस्तु एवं सेवा कर संघस्य अंतिमा गोष्ठी गतवर्षे अक्टूबर-मासे संजातासीत्।

## एन. टी. ए. समिति

राष्ट्रीय-परीक्षा-अभिकरणम् एन. टी. ए. इत्यनेन आयोज्यमानानां परीक्षाणां पारदर्शितया सुगमतया निष्पक्षतया संचालनं सुनिश्चियं कर्तुं शिक्षा-मंत्रालयेन एकस्य उच्चस्तरीय समितेः निर्माणं कृतम्। इसरो-भारतीय-अन्तरिक्षानुसंधान संघटनस्य प्रमुख: के. राधाकृष्णनः परीक्षा-प्रक्रियायां परिष्काराय सप्त-सदस्यात्मिकायाः समितेः नेतृत्वं करिष्यति ।

## तमिलनाडु कल्लाकुरिची

तमिलनाडु-प्रदेशस्य कल्लाकुरिची-विषाक्त-मद्य-त्रासंद्यां मृतकानां संख्या वर्धित्वा चतु:पञ्चाशत् अभवत्। राज्य-प्रशासनं जनपद-प्रशासनम् अवैध-मद्य-निर्माणे सम्मिलितानां जनानां विरोधे क्रियान्वयनं कर्तुम् उक्तवत्।

## ओडिशा

ओडिशा राज्ये, अद्य पुरी-नगरे श्रीमंदिरे भगवत: जगन्नाथस्य तस्य अनुजाग्रजयो: देवस्थान-पूर्णिमा उत् वा स्नानयात्रा विधि-विधानेन समारब्धा। अद्य प्रातःकाले 'दाता' इति नाम्ना: सेवकाः मंत्रोच्चारेण सह भगवत्जगन्नाथं भगवत्बलभद्रं भगवतीं सुभद्रां, सुदर्शनं, मदनमोहनश्च मुख्यमंदिरस्य गर्भगृहस्थिते रत्न-सिंहासनात् पहांडी इति शोभायात्रया नीतवन्तः। तान् बाह्यमंदिर- परिसरे स्थिते स्नान-वेदीं प्रति नीतवन्तः। मंदिरस्य पुरोहिता: स्नान-विधि-पूर्वं मंदिरस्य अन्त: परिसरे स्थिते स्वर्णकूप इति पवित्र-कूपात् आनीतेन जलेन स्थानोपचारं विहितवन्तः।

## लक्ष्य - संधान - स्पर्धा

भारतस्य ज्योति-सुरेखा वेन्नमः, परनीत-कौरः, अदिति-स्वामी च तुर्किये इत्यत्र-अन्ताल्या-लक्ष्यसन्धान-विश्व-चषक-चतुश्चत्वारिंशदुत्तर-द्विसहस्रे कम्पाउंड-टीम- स्पर्धायां स्वर्ण-पदकं व्यजयन्त। भारतीय-महिला-दलम् अद्य एस्टोनियां द्वात्रिंशदुत्तर द्विशतम्-ऊनत्रिंशदु-तर द्विशतम् अङ्कानां पुरस्तात् पराजित्य स्वर्ण-पदकं विजितवत्। अनेन विजयेन सह भारतीय दलं कम्पाउण्ड टीम-स्पर्धायां त्रीणि स्वर्ण-पदकानि विजितवत्।

## ऋतु विभाग

ऋतुविभागेन आगमिषु चतुर्ष-दिवसेषु केरल-कर्नाटक-गोवा-प्रदेशेषु अतिवृष्टेः अनुमानं प्रकटितम् सहैव गुजरात-महाराष्ट्र-लक्षद्वीप-आंध्र-प्रदेश-तेलंगाना-तमिलनाडु-पुडुचेरी-प्रदेशेषु गर्जेण सह मध्यमा वृष्टि: सम्भाव्यते। पूर्वोतरे नागालैण्ड-मणिपुर-मिजौरम-त्रिपुरा प्रदेशेषु अद्य अतिवृष्टि सम्भाव्यते।
उपगंगं बिहार-झारखण्ड-ओडिशा-अंडमान-निकोबार द्वीप-समूह-एतेषु प्रदेशेषु विद्युत-विद्योतनेन तीव्र-प्रवाहेण च सह मध्यमा वृष्टिः सम्भाव्यते । आगामिनो: द्वयोः दिवसयोः तापमानं वर्धितुं शक्नोति। ऋतु-विभागेन पीत वार्णिकी जनसंचेतना प्रसारिता।

## आई. सी. सी.

आई.सी.सी पुरुष अन्ताराष्ट्रिय-क्रिकेट-परिषद: पुरुष विंशति-विंशति- विश्व-चषक-चतुश्चत्वारिंशदुत्तर-द्विसहस्र इत्यस्यां श्रृङ्खलायाम् अद्य सायम् एंटीगुआया: नॉर्थसाऊण्ड इत्यत्र सर विवियन रिचर्डस स्टेडियम् इत्याख्ये क्रीडाङ्गणे सुपर-ऐट् अर्थात् उत्कृष्ट-अष्ट स्पर्धासु भारत-बांग्लादेशयोः स्पर्धा भविष्यति। स्पर्धा एषा भारतीय-समयस्य अनुसारेण रात्रौ अष्टवादने प्रारप्स्यते।

संस्कृत-साप्ताहिकी

संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक-वादनतःभविष्यति। भवन्तः सर्वे श्रोतुं प्रभवन्ति। भवति, आशासे भवन्तः प्रति रविवासरं श्रोष्यन्तीति।

विश्व-टेबल

विश्व-टेबल-टेनिस-कटेंडर-प्रतियोगितायाः महिला-युगल उपान्त्यचक्रे अद्य लागोसे भारतस्य श्रीजा अकुला, अर्चना गिरीश कामथस्यश्च अनयोः युगलम् भारतस्यैव आइहिका मुखर्जी, सुतीर्थी मुखर्जी अनयोः युगलं स्पर्धिष्यते।

।। इति वार्ता: ।।